## अष्टादशः पाठः

# विदुलानुशासनम्



महर्षिणा कृष्णद्वैपायनव्यासेन विरचितं ''महाभारतम्'' को न जानाति? ग्रन्थोऽयम् अष्टादशपर्वेषु विभक्तोऽस्ति। ग्रन्थेऽस्मिन् भारतीयसंस्कृतेः लोकजीवनस्य च व्यापकं चित्रणमस्ति। अत्र न केवलं कौरव-पाण्डवानां युद्धवर्णनम् अपितु, राजधर्म-राष्ट्र-धर्म-नीतिशास्त्र-पुरुषार्थचतुष्टयादीनां बाहुल्यम्। कथितम् यत् - 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्।'

महाभारतस्य उद्योगपर्वादुद्धृतेषु श्लोकेषु वीरमातुः विदुलायाः उपदेशाः सन्ति। सा हतोत्साहितं स्वकीयं पुत्रमुद्बोधयति।

**विदुला नाम राजन्या जगर्हे पुत्रमौरसम्।**
**निर्जितं सिन्धुराजेन शयानं दीनचेतसम्॥1॥**

**अन्वयः** - विदुला नाम राजन्या सिन्धुराजेन निर्जितं दीनचेतसम् शयानम् औरसं पुत्रं जगर्हे।

**शब्दार्थः** - राजन्या - क्षत्रिया, जगर्हे - अनिन्दत् (निन्दा की), औरसम् - स्वकीयं पुत्रम् (सगे पुत्र को), निर्जितम्- पराजितम् (पराजित), शयानम् - शयनं कुर्वाणम् (सोते हुए को)

**विदुला उवाच-**

**उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः।**
**अमित्रान्नन्दयन् सर्वान्निर्मानो बन्धुशोकदः॥2॥**

**अन्वयः** - हे कापुरुष! उत्तिष्ठ, बन्धुशोकदः सर्वान् निर्मानः पराजितः अमित्रान् नन्दयन् एवम् मा शेष्व।

**शब्दार्थः** - शेष्व -शयनं कुरु (सोओ), अमित्रान् - शत्रून् (शत्रुओं को), नन्दयन् - प्रसन्नं कुर्वन् (आनन्दित करता हुआ)

**अलातं तिन्दुकस्येव मुहूर्तमपि हि ज्वल।**
**मा तुषाग्निरिवानर्चिर्धूमायस्व जिजीविषुः॥3॥**

**अन्वयः** - तिन्दुकस्य अलातम् इव मुहूर्तम् अपि ज्वल हि, जिजीविषुः अनर्चिः, तुषाग्निः इव धूमायस्व मा।

**शब्दार्थः** - अलातम् - स्फुल्लिंगम् (चिनगारी / अलाव), तिन्दुकस्य - तेन्दुनाम्नः काष्ठस्य (तेन्दु नामक लकड़ी की), तुषाग्निः - तुषायां स्थिताग्निः (भूसी की आग), अनर्चिः -ज्वालां विना (ज्वाला रहित), धूमायस्व - धूम्रवत् आचरणं कुरु (धुएँ के समान आचरण करो), जिजीविषुः - जीवनस्येच्छा (जीवित रहने की इच्छा वाला)

**यस्य वृत्तं न जल्पन्ति मानवा महदद्भुतम्।**
**राशिवर्धनमात्रं स नैव स्त्री न पुनः पुमान्॥4॥**

**अन्वयः -** मानवाः महद् अद्भुतम् यस्य वृत्तं न जल्पन्ति सः न स्त्री पुनः न पुमान् (अपितु) राशिवर्धनमात्रम् एव।

**शब्दार्थः -** वृत्तम् - आचरणम् (चरित्र को) राशिवर्धनमात्रम् -संख्यावर्द्धक एव (संख्या या समूह को बढ़ाने वाला)

**दाने तपसि सत्ये च यस्य नोच्चरितं यशः।**

**विद्यायामर्थलाभे वा मातुरुच्चार एव सः॥5॥**

**अन्वयः -** यस्य यशः दाने तपसि च सत्ये विद्यायाम् अर्थलाभे वा न उच्चरितं सः मातुः उच्चार एव।

**शब्दार्थः-** उच्चारः - पुरीष (मल)

**श्रुतेन तपसा वाऽपि श्रिया वा विक्रमेण वा।**

**जनान् योऽभिभवत्यन्यान् कर्मणा हि स वै पुमान्॥6॥**

**अन्वयः -** श्रुतेन तपसा श्रिया विक्रमेण कर्मणा वा यः अन्यान् जनान् अभिभवति हि, सः वै पुमान्।

**शब्दार्थः -** श्रुतेन - शास्त्रज्ञानेन (शास्त्र ज्ञान से), श्रिया - ऐश्वर्येण (सम्पत्ति / ऐश्वर्य से), अभिभवति -पराभवति (हराता है / दबाता है)

**निरमर्षं निरुत्साहं निर्वीर्यमरिनन्दनम्।**

**मा स्म सीमन्तिनी काचिज्जनयेत्पुत्रमीदृशम्॥7॥**

**अन्वयः -** निरमर्षं निरुत्साहम् निर्वीर्यम् अरिनन्दनम् ईदृशं पुत्रम् काचित् सीमन्तिनी मा स्म जनयेत्।

**शब्दार्थः -** निरमर्षम् - अक्रोधम् (क्रोध रहित), सीमन्तिनी - सौभाग्यवती स्त्री

**यमाजीवन्ति पुरुषं सर्वभूतानि सञ्जय।**

**पक्वं द्रुममिवासाद्य तस्य जीवितमर्थवत्॥8॥**

**अन्वयः -** सञ्जय! सर्वभूतानि पक्वं द्रुमम् इव यम् पुरुषम् आसाद्य आजीवन्ति, तस्य जीवितम् अर्थवत्।

**शब्दार्थः -** पक्वम् - सुपक्वम् (पके हुए को), आसाद्य - आश्रयं गृहीत्वा (आश्रय लेकर), आजीवन्ति - जीवनं धारयन्ति (जीवन धारण करते है), अर्थवत् - सार्थकः (अर्थ सहित)

**स्वबाहुबलमाश्रित्य योऽभ्युज्जीवति मानवः।**

**स लोके लभते कीर्तिं परत्र च शुभां गतिम्॥9॥**

**अन्वयः -** यः मानवः स्वबाहुबलम् आश्रित्य अभि उज्जीवति सः लोके कीर्तिम् परत्र च शुभां गतिं लभते।

**पुत्र उवाच-**

**नेयं मतिस्त्वया वाच्या मातः पुत्रे विशेषतः।**

**कारुण्यमेवात्र पश्य भूत्वेह जडमूकवत्॥10॥**

**अन्वयः -** मातः! विशेषतः पुत्रे त्वया इयं मतिः न वाच्या, (अपितु) इह जडमूकवत् भूत्वा अत्र कारुण्यम् एव पश्य।

**शब्दार्थः -** वाच्या - वक्तव्या (कहनी चाहिए), जडमूकवत् - अज्ञानी इव मूक इव च (मूर्ख और गूँगे के जैसा)

**मातोवाच–**

**अथ त्वां पूजयिष्यामि हत्वा वै सर्वसैन्धवान्।**

**अहं पश्यामि विजयं कृच्छ्रभावितमेव ते॥11॥**

**अन्वयः –** अथ सर्वसैन्धवान् हत्वा त्वाम् पूजयिष्यामि, अहम् ते कृच्छ्रभावितं विजयम् एव पश्यामि।

**शब्दार्थः –** सर्वसैन्धवान् –सिन्धुदेशीयान् सर्वान् शत्रून् (सिन्धु देश के सभी शत्रुओं को), कृच्छ्रभावितम् – कष्टेन प्राप्तम् (कष्ट से प्राप्त हुई को)

**पुत्र उवाच–**

**अकोशस्यासहायस्य कुतः सिद्धिर्जयो मम।**

**इत्यवस्थां विदित्वैतामात्मनात्मनि दारुणाम्।**

**राज्याद् भावो निवृत्तो मे त्रिदिवादिव दुष्कृतः॥12॥**

**अन्वयः –** अकोशस्य असहायस्य मम जयः सिद्धिः कुतः? आत्मना आत्मनि एतां दारुणाम् इति अवस्थां विदित्वा त्रिदिवात् दुष्कृतः इव मे राज्यात् भावः निवृत्तः।

**शब्दार्थः –** अकोशस्य – कोशरहितस्य (कोश रहित का), आत्मनि – स्वमनसि (अपने मन में), त्रिदिवात् – स्वर्गात् (स्वर्ग से), दुष्कृतः – पापकर्म संलग्नानाम् (पापियों के)

**मातोवाच**

**पुत्र नात्माऽवमन्तव्यः पूर्वाभिरसमृद्धिभिः।**

**अभूत्वा हि भवन्त्यर्था भूत्वा नश्यन्ति चापरे।**

**अमर्षेणैव चाप्यर्था नारब्धव्याः सुबालिशैः॥13॥**

**अन्वयः –** पुत्र! पूर्वाभिः असमृद्धिभिः आत्मा न अवमन्तव्यः, हि अर्थाः अभूत्वा भवन्ति अपरे भूत्वा नश्यन्ति। सुबालिशैः अपि च अमर्षेण एव अर्थाः न आरब्धव्याः।

**शब्दार्थः –** सुबालिशैः – मूर्खैः (मूर्खों के द्वारा), अपरे – अन्ये (अन्य अर्थात् पूर्ववर्ती)

**सर्वेषां कर्मणां तात फले नित्यमनित्यता।**

**अनित्यमिति जानन्तो न भवन्ति भवन्ति च॥14॥**

**अन्वयः –** तात! सर्वेषां कर्मणां फले नित्यम् अनित्यता इति अनित्यं जानन्तः न भवन्ति भवन्ति च।

**शब्दार्थः –** अनित्यता – अस्थिरता

**उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु।**

**भविष्यतीत्येव मनः कृत्वा सततमव्यथैः॥15॥**

**अन्वयः –** भविष्यति इति एव सततम् अव्यथैः मनः कृत्वा उत्थातव्यं जागृतव्यम् भूतिकर्मसु योक्तव्यम्।

**शब्दार्थः –** अव्यथैः– व्यथारहितैः (व्यथित हुए बिना), भूतिकर्मसु – कल्याणकार्येषु (कल्याण के कार्यों में), योक्तव्यम् – योजितव्यम् (योजित या संलग्न होना चाहिए)

## अभ्यासः

1. **एकपदेन उत्तरत-**

(क) सञ्जयः सङ्ग्रामे केन निर्जितः?

(ख) कः जनः राशिवर्धनमात्रम्?

(ग) सीमन्तिनी कीदृशं पुत्रं न जनयेत्?

(घ) लोके कीर्तिं कः लभते?

(ङ) सञ्जयस्य मातुः नाम किम्?

2. **एकवाक्येन उत्तरत-**

(क) विदुला कीदृशं पुत्रं प्रतिबोधयति?

(ख) कस्य जीवितम् अर्थवत् भवति?

(ग) कः मातुरुच्चारः अस्ति?

(घ) अनित्यता कुत्र भवति?

3. **त्रिचतुर्भिर्वाक्यैः उत्तरत-**

(क) विदुला स्वपुत्रं सञ्जयं किमर्थं जगर्हे?

(ख) 'राज्याद् भावो निवृत्तो मे' इति सञ्जयेन किमर्थं कथितम्?

(ग) सञ्जयः स्वकीयनैराश्यभावस्य किं कारणम् अकथयत्?

(घ) विदुला कर्मनिष्ठायाः किं महत्त्वं प्रतिपादितवती।

(ङ) विदुलायाः मतानुसारेण कः पुमान् अस्ति?

4. **कोष्ठके प्रदत्तशब्दानाम् उचितशब्दरूपेण रिक्तस्थानानि पूरयत-**

(क) यस्य...............न जल्पन्ति मानवा महदद्भुतम्। (वृत्त)

(ख) यमाजीवन्ति.............सर्वभूतानि सञ्जय! (पुरुष)

(ग) सर्वेषां................तात फले नित्यमनित्यता। (कर्म)

(घ) ..........असहायस्य कुतः सिद्धिर्जयो मम। (अकोश)

(ङ) स...........लभते कीर्तिं परत्र च शुभां गतिम्। (लोक)

5. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत-**

(क) दीनचेतसम्

(ख) अमर्षेण

(ग) स्वबाहुबलम्

(घ) बन्धुशोकदः

(ङ) अरिनन्दनम्

6. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत–**

(क) अमर्षेणैव

(ख) मातुरुच्चारः

(ग) तुषाग्निरिव

(घ) तिन्दुकस्येव

(ङ) शेष्वैवम्

(च) चापरे

7. **अधोलिखितानां क्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत–**

| | | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| (क) | जगर्हे | --------- | --------- | --------- | --------- |
| (ख) | अभिभवति | --------- | --------- | --------- | --------- |
| (ग) | जल्पन्ति | --------- | --------- | --------- | --------- |
| (घ) | जनयेत् | --------- | --------- | --------- | --------- |
| (ङ) | नश्यन्ति | --------- | --------- | --------- | --------- |
| (च) | पश्य | --------- | --------- | --------- | --------- |
| (छ) | पूजयिष्यामि | --------- | --------- | --------- | --------- |
| (ज) | पश्यामि | --------- | --------- | --------- | --------- |
| (झ) | भवन्ति | --------- | --------- | --------- | --------- |
| (ञ) | उत्तिष्ठ | --------- | --------- | --------- | --------- |

8. **अधोलिखितानां पदानां प्रकृतिं प्रत्ययं च पृथक्कृत्वा लिखत –**

| | पदम् | प्रकृतिः | प्रत्ययः |
|---|---|---|---|
| (क) | कृत्वा | ........... | ............ |
| (ख) | योक्तव्यम् | ........... | ............ |
| (ग) | आश्रित्य | ........... | ............ |
| (घ) | हत्वा | ........... | ............ |
| (ङ) | उत्थातव्यम् | ........... | ............ |

9. **अधोलिखितानां श्लोकानामन्वयं कुरुत-**

(क) विदुला नाम................दीनचेतसम्॥

(ख) दाने तपसि................एव सः॥

(ग) श्रुतेन तपसा...............वै पुमान्॥

(घ) स्वबाहुबलमाश्रित्य...............शुभां गतिम्॥

(ङ) उत्थातव्यं...........सततमव्यथैः॥

10. **''मानवजीवनस्य सार्थकता'' इति विषयमवलम्ब्य संस्कृते दशवाक्यानि लिखत।**

## योग्यताविस्तारः -

- विदुलायाः चारित्र्यवैशिष्ट्यम् प्रदर्शयत।
- विदुलामाद्धृत्य महाभारतकालीनसमाजे नारीदशां निरूपयत।
- महाभारतस्य अन्यां कथां चित्वा अभ्यासपुस्तिकायां लिख़त।
- 'विदुलानुशासनम्' इति पाठमाद्धृत्य कक्षायां सम्भाषणपरिचर्चां कुरुत।